श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ त्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिंशः सर्गः ॥

## शरद्वर्णनं श्रीरामेण लक्ष्मणाय सुग्रीवपार्श्वं गन्तुमादेशदानम्

गृहं प्रविष्टे सुग्रीवे विमुक्ते गगने घनैः।
वर्षरात्रे स्थितो रामः कामशोकाभिपीडितः॥ **4.30.1** ॥

पाण्डुरं गगनं दृष्ट्वा विमलं चन्द्रमण्डलम्।
शारदीं रजनीं चैव दृष्ट्वा ज्योत्स्नानुलेपनाम्॥ **4.30.2** ॥

कामवृत्तं च सुग्रीवं नष्टां च जनकात्मजाम्।
दृष्ट्वा कालमतीतं च मुमोह परमातुरः॥ **4.30.3** ॥

स तु संज्ञामुपागम्य मुहूर्तान्मतिमान् नृपः।
मनः स्थामपि वैदेहीं चिन्तयामास राघवः॥ **4.30.4** ॥

दृष्ट्वा च विमलं व्योम गतविद्युद्बलाहकम्।
सारसारावसङ्घुष्टं विललापार्तया गिरा॥ **4.30.5** ॥

आसीनः पर्वतस्याग्रे हेमधातुविभूषिते।
शारदं गगनं दृष्ट्वा जगाम मनसा प्रियाम्॥ **4.30.6** ॥

सारसारावसन्नादैः सारसारावनादिनी।
याऽऽश्रमे रमते बाला साद्य मे रमते कथम्॥ **4.30.7** ॥

पुष्पितांश्चासनान् दृष्ट्वा काञ्चनानिव निर्मलान्।
कथं सा रमते बाला पश्यन्ती मामपश्यती ॥ **4.30.8** ॥

या पुरा कलहंसानां कलेन कलभाषिणी।
बुध्यते चारुसर्वाङ्गी साद्य मे रमते कथम् ॥ **4.30.9** ॥

निःस्वनं चक्रवाकानां निशम्य सहचारिणाम्।
पुण्डरीकविशालाक्षी कथमेषा भविष्यति ॥ **4.30.10** ॥

सरांसि सरितो वापीः काननानि वनानि च।
तां विना मृगशावाक्षीं चरन्नाद्य सुखं लभे ॥ **4.30.11** ॥

अपि तां मद्वियोगाच्च सौकुमार्याच्च भामिनीम्।
सुदूरं पीडयेत् कामः शरद्गुणनिरन्तरः ॥ **4.30.12** ॥

एवमादि नरश्रेष्ठो विललाप नृपात्मजः।
विहङ्ग इव सारङ्गः सलिलं त्रिदशेश्वरात् ॥ **4.30.13** ॥

ततश्चञ्चूर्य रम्येषु फलार्थी गिरिसानुषु।
ददर्श पर्युपावृत्तो लक्ष्मीवान् लक्ष्मणोऽग्रजम् ॥ **4.30.14** ॥

स चिन्तया दुस्सहया परीतं
विसंज्ञमेकं विजने मनस्वी।
भ्रातुर्विषादात् त्वरितोऽतिदीनः
समीक्ष्य सौमित्रिरुवाच दीनम् ॥ **4.30.15** ॥

किमार्य कामस्य वशङ्गतेन
किमात्मपौरुष्यपराभवेन।
अयं ह्रिया संह्रियते समाधिः
किमत्र योगेन निवर्तते न ॥ **4.30.16** ॥

क्रियाभियोगं मनसः प्रसादं
समाधियोगानुगतं च कालम्।
सहायसामर्थ्यमदीनसत्त्वः
स्वकर्महेतुं च कुरुष्व तात॥ **4.30.17** ॥

न जानकी मानववंशनाथ
त्वया सनाथा सुलभा परेण।
न चाग्निचूडां ज्वलितामुपेत्य
न दह्यते वीर वरार्ह कश्चित्॥ **4.30.18** ॥

सलक्षणं लक्ष्मणमप्रधृष्यं
स्वभावजं वाक्यमुवाच रामः।
हितं च पथ्यं च नयप्रसक्तं
ससामधर्मार्थसमाहितं च॥ **4.30.19** ॥

निस्संशयं कार्यमवेक्षितव्यं
क्रियाविशेषोऽप्यनुवर्तितव्यः।
न तु प्रवृद्धस्य दुरासदस्य
कुमार वीर्यस्य फलं च चिन्त्यम्॥ **4.30.20** ॥

अथ पद्मपलाशाक्षीं मैथिलीमनुचिन्तयन्।
उवाच लक्ष्मणं रामो मुखेन परिशुष्यता॥ **4.30.21** ॥

तर्पयित्वा सहस्राक्षः सलिलेन वसुन्धराम्।
निर्वर्तयित्वा सस्यानि कृतकर्मा व्यवस्थितः॥ **4.30.22** ॥

दीर्घगम्भीरनिर्घोषाः शैलद्रुमपुरोगमाः।
विसृज्य सलिलं मेघाः परिशान्ता नृपात्मज॥ **4.30.23** ॥

नीलोत्पलदलश्यामाः श्यामीकृत्वा दिशो दश।
विमदा इव मातङ्गाः शान्तवेगाः पयोधराः ॥ **4.30.24** ॥

जलगर्भा महावेगाः कुटजार्जुनगन्धिनः।
चरित्वा विरताः सौम्य वृष्टिवाताः समुद्यताः ॥ **4.30.25** ॥

घनानां वारणानां च मयूराणां च लक्ष्मण।
नादः प्रस्रवणानां च प्रशान्तः सहसानघ ॥ **4.30.26** ॥

अभिवृष्टा महामेघैर्निर्मलाश्चित्रसानवः।
अनुलिप्ता इवाभान्ति गिरयश्चन्द्ररश्मिभिः ॥ **4.30.27** ॥

शाखासु सप्तच्छदपादपानां
प्रभासु तारार्कनिशाकराणाम्।
लीलासु चैवोत्तमवारणानां
श्रियं विभज्याद्य शरत्प्रवृत्ता ॥ **4.30.28** ॥

सम्प्रत्यनेकाश्रयचित्रशोभा
लक्ष्मीः शरत्कालगुणोपपन्ना।
सूर्याग्रहस्तप्रतिबोधितेषु
पद्माकरेष्वभ्यधिकं विभाति ॥ **4.30.29** ॥

सप्तच्छदानां कुसुमोपगन्धी
षट्पादवृन्दैरनुगीयमानः।
मत्तद्विपानां पवनानुसारी
दर्पं विनेष्यन्नधिकं विभाति ॥ **4.30.30** ॥

अभ्यागतैश्चारुविशालपक्षैः
स्मरप्रियैः पद्मरजोऽवकीर्णैः।

महानदीनां पुलिनोपयातैः
क्रीडन्ति हंसाः सह चक्रवाकैः ॥ **4.30.31** ॥

मदप्रगल्भेषु च वारणेषु
गवां समूहेषु च दर्पितेषु।
प्रसन्नतोयासु च निम्नगासु
विभाति लक्ष्मीर्बहुधा विभक्ता ॥ **4.30.32** ॥

नभः समीक्ष्याम्बुधरैर्विमुक्तं
विमुक्तबर्हाभरणा वनेषु।
प्रियास्वरक्ता विनिवृत्तशोभा
गतोत्सवा ध्यानपरा मयूराः ॥ **4.30.33** ॥

मनोज्ञगन्धैः प्रियकैरनल्पैः
पुष्पातिभारावनताग्रशाखैः।
सुवर्णगौरैर्नयनाभिरामै -
रुद्योतितानीव वनान्तराणि ॥ **4.30.34** ॥

प्रियान्वितानां नलिनीप्रियाणां
वने प्रियाणां कुसुमोद्गतानाम्।
मदोत्कटानां मदलालसानां
गजोत्तमानां गतयोऽद्य मन्दाः ॥ **4.30.35** ॥

व्यक्तं नभः शस्त्रविधौतवर्णं
कृशप्रवाहानि नदीजलानि।
कह्लारशीताः पवनाः प्रवान्ति
तमो विमुक्ताश्च दिशः प्रकाशाः ॥ **4.30.36** ॥

सूर्यातपक्रामणनष्टपङ्का
    भूमिश्चिरोद्धाटितसान्द्ररेणुः।
अन्योन्यवैरेण समायुताना -
    मुद्योगकालोऽद्य नराधिपानाम्॥ **4.30.37** ॥

शरद्गुणाप्यायितरूपशोभाः
    प्रहर्षिताः पांसुसमुत्थिताङ्गाः।
मदोत्कटाः सम्प्रति युद्धलुब्धा
    वृषा गवां मध्यगता नदन्ति॥ **4.30.38** ॥

समन्मथा तीव्रतरानुरागा
    कुलान्विता मन्दगतिः करेणुः।
मदान्वितं सम्परिवार्य यान्तं
    वनेषु भर्तारमनुप्रयाति॥ **4.30.39** ॥

त्यक्त्वा वराण्यात्मविभूषितानि
    बर्हाणि तीरोपगता नदीनाम्।
निर्भर्त्स्यमाना इव सारसौघैः
    प्रयान्ति दीना विमना मयूराः॥ **4.30.40** ॥

वित्रास्य कारण्डवचक्रवाकान्
    महारवैर्भिन्नकटा गजेन्द्राः।
सरस्सुबद्धाम्बुजभूषणेषु
    विक्षोभ्य विक्षोभ्य जलं पिबन्ति॥ **4.30.41** ॥

व्यपेतपङ्कासु सवालुकासु
    प्रसन्नतोयासु सगोकुलासु।
ससारसारावविनादितासु
    नदीषु हंसा निपतन्ति हृष्टाः॥ **4.30.42** ॥

नदीघनप्रस्रवणोदकाना -
    मतिप्रवृद्धानिलबर्हिणानाम्।
प्लवङ्गमानां च गतोत्सवानां
    ध्रुवं रवाः सम्प्रति सम्प्रणष्टाः॥ **4.30.43** ॥

अनेकवर्णाः सुविनष्टकाया
    नवोदितेष्वम्बुधरेषु नष्टाः।
क्षुधार्दिता घोरविषा बिलेभ्य -
    श्चिरोषिता विप्रसरन्ति सर्पाः॥ **4.30.44** ॥

चञ्चच्चन्द्रकरस्पर्शहर्षोन्मीलिततारका।
अहो रागवती सन्ध्या जहाति स्वयमम्बरम्॥ **4.30.45** ॥

रात्रिः शशाङ्कोदितसौम्यवक्त्रा
    तारागणोन्मीलितचारुनेत्रा।
ज्योत्स्नांशुकप्रावरणा विभाति
    नारीव शुक्लांशुकसंवृताङ्गी॥ **4.30.46** ॥

विपक्वशालिप्रसवानि भुक्त्वा
    प्रहर्षिता सारसचारुपङ्क्तिः।
नभः समाक्रामति शीघ्रवेगा
    वातावधूता ग्रथितेव माला॥ **4.30.47** ॥

सुप्तैकहंसं कुमुदैरुपेतं
    महाह्रदस्थं सलिलं विभाति।
घनैर्विमुक्तं निशि पूर्णचन्द्रं
    तारागणाकीर्णमिवान्तरिक्षम्॥ **4.30.48** ॥

प्रकीर्णहंसाकुलमेखलानां
प्रबुद्धपद्मोत्पलमालिनीनाम्।
वाप्युत्तमानामधिकाद्य लक्ष्मी -
र्वराङ्गनानामिव भूषितानाम्॥ **4.30.49** ॥

वेणुस्वरव्यञ्जिततूर्यमिश्रः
प्रत्यूषकालेऽनिलसम्प्रवृत्तः।
सम्मूर्छितो गर्गरगोवृषाणा -
मन्योन्यमापूरयतीव शब्दः॥ **4.30.50** ॥

नवैर्नदीनां कुसुमप्रहासै
र्व्याधूयमानैर्मृदुमारुतेन।
धौतामलक्षौमपटप्रकाशैः
कूलानि काशैरुपशोभितानि॥ **4.30.51** ॥

वनप्रचण्डा मधुपानशौण्डाः
प्रियान्विताः षड्चरणाः प्रहृष्टाः।
वनेषु मत्ताः पवनानुयात्रां
कुर्वन्ति पद्मासनरेणुगौराः॥ **4.30.52** ॥

जलं प्रसन्नं कुसुमप्रहासं
क्रौञ्चस्वनं शालिवनं विपक्वम्।
मृदुश्च वायुर्विमलश्च चन्द्रः
शंसन्ति वर्षव्यपनीतकालम्॥ **4.30.53** ॥

मीनोपसन्दर्शितमेखलानां
नदीवधूनां गतयोऽद्य मन्दाः।
कान्तोपभुक्तालसगामिनीनां
प्रभातकालेष्विव कामिनीनाम्॥ **4.30.54** ॥

सचक्रवाकानि सशैवलानि
काशैर्दुकूलैरिव संवृतानि।
सपत्ररेखाणि सरोचनानि
वधूमुखानीव नदीमुखानि ॥ **4.30.55** ॥

प्रफुल्लबाणासनचित्रितेषु
प्रहृष्टषट्पादनिकूजितेषु।
गृहीतचापोद्यतदण्डचण्डः
प्रचण्डचापोऽद्य वनेषु कामः ॥ **4.30.56** ॥

लोकं सुवृष्ट्या परितोषयित्वा
नदीस्तटाकानि च पूरयित्वा।
निष्पन्नसस्यां वसुधां च कृत्वा
त्यक्त्वा नभस्तोयधराः प्रणष्टाः ॥ **4.30.57** ॥

दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः।
नवसङ्गमसव्रीडा जघनानीव योषितः ॥ **4.30.58** ॥

प्रसन्नसलिलाः सौम्य कुरराभिविनादिताः।
चक्रवाकगणाकीर्णा विभान्ति सलिलाशयाः ॥ **4.30.59** ॥

अन्योन्यबद्धवैराणां जिगीषूणां नृपात्मज।
उद्योगसमयः सौम्य पार्थिवानामुपस्थितः ॥ **4.30.60** ॥

इयं सा प्रथमा यात्रा पार्थिवानां नृपात्मज।
न च पश्यामि सुग्रीवमुद्योगं च तथाविधम् ॥ **4.30.61** ॥

असनाः सप्तपर्णाश्च कोविदाराश्च पुष्पिताः।
दृश्यन्ते बन्धुजीवाश्च श्यामाश्च गिरिसानुषु ॥ **4.30.62** ॥

हंससारसचक्राह्वैः कुररैश्च समन्ततः।
पुलिनान्यवकीर्णानि नदीनां पश्य लक्ष्मण ॥ **4.30.63** ॥

चत्वारो वार्षिका मासा गता वर्षशतोपमाः।
मम शोकाभितप्तस्य तथा सीतामपश्यतः ॥ **4.30.64** ॥

चक्रवाकीव भर्तारं पृष्ठतोऽनुगता वनम्।
विषमं दण्डकारण्यमुद्यानमिव चाङ्गना ॥ **4.30.65** ॥

प्रियाविहीने दुःखार्ते हृतराज्ये विवासिते।
कृपां न कुरुते राजा सुग्रीवो मयि लक्ष्मण ॥ **4.30.66** ॥

अनाथो हृतराज्योऽहं रावणेन च धर्षितः।
दीनो दूरगृहः कामी मां चैव शरणं गतः ॥ **4.30.67** ॥

इत्येतैः कारणैः सौम्य सुग्रीवस्य दुरात्मनः।
अहं वानरराजस्य परिभूतः परन्तपः ॥ **4.30.68** ॥

स कालं परिसङ्ख्याय सीतायाः परिमार्गणे।
कृतार्थः समयं कृत्वा दुर्मतिर्नावबुध्यते ॥ **4.30.69** ॥

स किष्किन्धां प्रविश्य त्वं ब्रूहि वानरपुङ्गवम्।
मूर्खं ग्राम्यसुखे सक्तं सुग्रीवं वचनान्मम ॥ **4.30.70** ॥

अर्थिनामुपपन्नानां पूर्वं चाप्युपकारिणाम्।
आशां संश्रुत्य यो हन्ति स लोके पुरुषाधमः ॥ **4.30.71** ॥

शुभं वा यदि वा पापं यो हि वाक्यमुदीरितम्।
सत्येन परिगृह्णाति स वीरः पुरुषोत्तमः ॥ **4.30.72** ॥

कृतार्था ह्यकृतार्थानां मित्राणां न भवन्ति ये।
तान् मृतानपि क्रव्यादाः कृतघ्नान् नोपभुञ्जते ॥ **4.30.73** ॥

नूनं काञ्चनपृष्ठस्य विकृष्टस्य मया रणे।
द्रष्टुमिच्छसि चापस्य रूपं विद्युद्गणोपमम्॥ **4.30.74** ॥

घोरं ज्यातलनिर्घोषं क्रुद्धस्य मम संयुगे।
निर्घोषमिव वज्रस्य पुनः संश्रोतुमिच्छसि॥ **4.30.75** ॥

काममेवङ्गतेऽप्यस्य परिज्ञाते पराक्रमे।
त्वत्सहायस्य मे वीर न चिन्ता स्यान्नृपात्मज॥ **4.30.76** ॥

यदर्थमयमारम्भः कृतः परपुरञ्जय।
समयं नाभिजानाति कृतार्थः प्लवगेश्वरः॥ **4.30.77** ॥

वर्षाः समयकालं तु प्रतिज्ञाय हरीश्वरः।
व्यतीतांश्चतुरो मासान् विहरन् नावबुध्यते॥ **4.30.78** ॥

सामात्यपरिषत्क्रीडन् पानमेवोपसेवते।
शोकदीनेषु नास्मासु सुग्रीवः कुरुते दयाम्॥ **4.30.79** ॥

उच्यतां गच्छ सुग्रीवस्त्वया वीर महाबल।
मम रोषस्य यद्रूपं ब्रूयाश्चैनमिदं वचः॥ **4.30.80** ॥

न स सङ्कुचितः पन्था येन वाली हतो गतः।
समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः॥ **4.30.81** ॥

एक एव रणे वाली शरेण निहतो मया।
त्वां तु सत्यादतिक्रान्तं हनिष्यामि सबान्धवम्॥ **4.30.82** ॥

यदेवं विहिते कार्ये यद्धितं पुरुषर्षभ।
तत् तद् ब्रूहि नरश्रेष्ठ त्वर कालव्यतिक्रमः॥ **4.30.83** ॥

कुरुष्व सत्यं मम वानरेश्वर
प्रतिश्रुतं धर्ममवेक्ष्य शाश्वतम्।

मा वालिनं प्रेतगतो यमक्षये
    त्वमद्य पश्येर्मम चोदितः शरैः ॥ **4.30.84** ॥

स पूर्वजं तीव्रविवृद्धकोपं
    लालप्यमानं प्रसमीक्ष्य दीनम्।
चकार तीव्रां मतिमुग्रतेजा
    हरीश्वरे मानववंशनाथः ॥ **4.30.85** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे त्रिंशः सर्गः ॥